This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/



Title. → ~~त्र~~ जगदुत्पत्तिकारण सह विज्ञान (अपूर्ण)

Author → ?

Date → ?

Subject → Vedanta, Veda.

folioes → 4

Xerox pages → 8

Acc. No. → ~~227~~ M1399

Checked 2012

KKSU LIBRARY
RAMTEK
441 106
M-1399
Dist Nagpur

प्र०६

लोकाभावानुपपत्तिवत्सुषुप्तेविज्ञानाभावानुपपत्तेः नन्वंधकारेचक्षुषारूपानुप[illegible]लब्धौचक्षुषोभावःशक्यःकल्पयितुंनवैनाशिकेन
वैनाशिकोज्ञेयाभावेज्ञानाभावंकल्पयत्येवेतिचे[illegible]येनतदभावंकल्पयेत्तस्याभावःकेनकल्प्यतइतिवक्तव्यंवैनाशिकेनतदभावस्यापि
ज्ञेयत्वाज्ज्ञानाभावेतदनुपपत्तेःज्ञेयाव्यतिरिक्तत्वाद्ज्ञेयाभावेज्ञानाभावइतिचेन्नाभावस्यापिज्ञेयाभ्युपगमादभावोपिज्ञेयोभ्युपगम्यतेवैना
शिकैर्नित्यश्चतदव्यतिरिक्तंचेज्ज्ञानंनित्यंकल्पितंस्यात्तदभावस्यचज्ञानात्मकत्वादभावत्वंवाङ्मात्र[redacted]मेवनपरमार्थतो
भावत्वमनित्यत्वंचज्ञानस्यनचनित्यस्यज्ञानस्याभावनाममात्रेणच्छिन्नं।अथाभावोज्ञेयोपिसन्ज्ञानव्यतिरिक्तइतिचेन्ननतर्हिज्ञेयाभावेज्ञाना
भावःज्ञेयंज्ञानव्यतिरिक्तंनतुज्ञानंज्ञेयव्यतिरिक्तमितिचेन्नशब्दमात्रत्वाद्विशेषानुपपत्तेःज्ञेयज्ञानयोरेकत्वंचेदभ्युपगम्यतेज्ञेयंज्ञानव्य
तिरिक्तंज्ञानंनेतितुशब्दमात्रमेवतत्वह्निरग्निव्यतिरिक्तोऽग्निर्नवह्निव्यतिरिक्तइतियद्वत्ज्ञेयव्यतिरेकेतुज्ञानस्यज्ञेयाभावेज्ञानाभावानुपपत्तिः
सिद्धाज्ञेयाभावेऽदर्शनादभावइतिचेन्नसुषुप्तेप्यभ्युपगमात्वैनाशिकैरभ्युपगम्यतेहिसुषुप्तेविज्ञानास्तित्वंतत्रापिज्ञेयत्वमभ्युपगम्यतेज्ञान
स्यस्वेनैवेतिचेन्नभेदस्यसिद्धत्वात्सिद्धंह्यभावविज्ञेयविषयस्यज्ञानस्याभावज्ञेयव्यतिरेकात्ज्ञेयज्ञानयोरन्यत्वंनहितत्सिद्धंमृतमिवोज्जीवयितुंपुनरन्
यथाकर्तुंशक्यतेवैनाशिकशतैरपिज्ञानस्यज्ञेयत्वमेवेतितदप्यन्येनतदप्यन्येनेतित्वत्पक्षेऽतिप्रसंगइतिचेन्नतद्विभागोपपत्तेःसर्वस्ययदाहिसर्वंज्ञेयंकस्य
चित्तदातद्व्यतिरिक्तंज्ञानंज्ञानमेवेतिद्वितीयोविभागएवाभ्युपगम्यतेऽवैनाशिकैर्नतृतीयस्तद्विषयइत्यनवस्थानुपपत्तिःज्ञानस्यस्वेनैवविज्ञेयत्वे
सर्वज्ञत्वहानिरितिचेत्सोपिदोषस्तस्यैवास्तुकिंतन्निबर्हणेनास्माकमनवस्थादोषश्चज्ञानस्यज्ञेयत्वाभ्युपगमादवश्यंचवैनाशिकानांज्ञानंज्ञेयंस्व
त्मनाचाविज्ञेयत्वेनानवस्थानिवार्यासमानएवायंदोषइतिचेन्नज्ञानस्यैकत्वोपपत्तेःसर्वदेशकालपुरुषाद्यवस्थमेकमेवज्ञानंनामरूपाद्यनेकोपाधि
भेदात्सवित्रादिजलादिप्रतिबिंबवदनेकधावभासतइतिनासौदोषःतथाचेहइदमुच्यतेननुश्रुतेरिहैवांतःशरीरेपरिछिन्नःकुंडबदरवत्पुरुषइति
प्राणादिकलाकारणत्वान्नहिशरीरमात्रपरिच्छिन्नस्यप्राणश्रद्धादीनांकलानांकारणत्वंप्रतिपत्तुंशक्यंकलाकार्यत्वाच्चशरीरस्यनहिपु
रुषकार्याणांकलानांकार्यंसच्छरीरंकारणकारणंस्वस्यपुरुषंकुंडबदरमिवाभ्यंतरीकुर्यात्बीजवत्स्यादितिचेद्यथाबीजकार्यंवृक्षःतत्कार्यंचफलंस्वका
बीज रणकारणंफलमभ्यंतरेकरोत्याम्रादितद्वत्पुरुषमभ्यंतरीकुर्याच्छरीरंस्वकारणकारणमपीतिचेन्नान्यत्वात्सावयवत्वाच्चदृष्टांतेकारणबीजा द्रूक्षफल
वृतान्यन्यान्येवबीजानिदृष्टांतिकेतुस्वकारणकारणभूतःसएवपुरुषःशरीरेभ्यंतरीकृतःश्रूयतेबीजवृक्षशरीरीणांसावयवत्वाच्चस्यादाधाराधेय सं
त्वंनिरवयवश्चपुरुषःसावयवाःकलाःशरीरंचैतेनाकाशस्यापिशरीराधारत्वमनुपपन्नंकिमुताकाशकारणस्यपुरुषस्यतस्मादसमानोदृष्टांतः
किंदृष्टांतेनवचनात्स्यादितिचेन्नवचनस्याकारकत्वान्नहिवचनंवस्तुनोन्यथाकरणेव्याप्रियतेकिंतर्हियथाभूतार्थद्योतनेतस्मादंतःशरीरइत्ये
त[illegible]द्वचनमंडस्यांतर्व्योमेतिवद्द्रष्टव्यंउपलब्धिनिमित्तत्वाद्दर्शनश्रवणमननविज्ञानादिलिंगैरंतःशरीरपरिच्छिन्नइवह्युपलभ्यतेपुरु
षउपलभ्यतेचातउच्यतेअंतःशरीरेसोम्यसपुरुषइतिनपुनराकाशकारणःसन्कुंडबदरवच्छरीरपरिच्छिन्नइतिमनसापीच्छतिवक्तुंमूढो

पाछ्यतिवक्तुं किमुत प्रमाणान्तरनाश्रुतिः। यस्मिन्नेताः षोडशकलाः प्रभवंतीत्युक्तं पुरुषविशेषणार्थं कलानां प्रभवः सत्वान
र्थोपि श्रुतेः केनक्रमेण स्यादित्यत इदमुच्यते चेतनहर्षविकाचस्तृष्टिरित्येवमर्थं च पुरुषः षोडशकलः इष्टो यो भारद्वाजेन
सईक्षांचक्रे ईक्षणं कर्तृत्वं चक्रेऽकृतवानित्यर्थः। स्पष्टफलकर्मादिविषयं कथमुच्यते कस्मिन्कर्तृविशेषे देहलघुत्क्रान्ते उत्क्रान्तो भ
विष्याम्यहमेव कस्मिन्वा शरीरे प्रतिष्ठिते प्रतिष्ठास्या[illegible]मि प्रतिष्ठितः स्यामित्यर्थः। नन्वीस्ताकर्तृप्रधानकर्तृजातः पुरुषाय
प्रमाणमुररीकृत्य प्रधानं वर्तते महदाद्याकारेणात्रेदमनुपपन्नं पुरुषस्यापास्थाने प्रोणे क्षणहर्षकं कर्तृत्ववचनं सत्वादिकं गुणसा
म्य प्रधाने प्रमाणोपपन्ने स्फटिकतीरि समीईश्वरेच्छानुवर्तिषु चाणुषु सत्सु जातं नोप्येकत्वेन कर्तृत्वे साधनाभोवारात्मानैयायि
नर्थकर्तृत्वानुपपत्तेश्च न हि चेतनावान्बुद्धिसर्वकृपीतनोनर्थं कुर्यात्तस्मात्पुरुषार्थेन प्रयोजनेनेईक्षा एव कर्तृनियतक्रमेण
प्रवर्तमाने चेतने प्रधाने चेतनत्वं इव दुपचारो नसईक्षांचक्रे इत्यादि यथा राज्ञः सर्वार्थकारिणि मृत्ये राजेति न कृतात्मनो[illegible]
भोक्तृत्ववत्कर्तृत्वोपपत्तेः यथा सांख्यस्याचिन्मात्रस्यापरिणामिनो भोक्तृत्वं तद्वदेवादिनामीश्वाकर्तृत्वं केजगत्कर्तृत्व
मुपपन्नं श्रुतिप्रामाण्यात् नत्वांतरपरिणामोऽनेकत्वाभुक्त्वा शुद्धत्वा नेकनिमित्तोना चिन्मात्रस्वरूपाविक्रियात्पुरुषस्यैव
स्वात्मन्यपवमोक्तृचे चिन्मात्रस्वरूपविक्रियापानदोषोऽपि भवता पुनर्वेदवादिनां स्फटिकत्वेन त्वांतरपरिणामोऽपि वस्तुत्
नोनिसत्वादसर्वदोषप्रसंगइति चेन्नैकस्याप्यात्मनोऽविद्याविषयनामरूपोपाधिकृतविशेषाभ्युपगमादविद्याहृतना
मरूपोपाधिकं चेतनत्वमेकमेवाद्वितीयं सर्वतार्किकबुद्ध्यनवगाह्यं ममभयं शिवमिष्यते नात्र कर्तृत्वं भोक्तृत्वं वा क्रियाकारकफलं च
तिकल्पयितुं चागमबाह्यत्वात्सु नस्तातस्यस्यतः परमार्थतएव मोक्ष च पुरुषस्य छ्वितित्वान रेच प्रधानपुरुषात्परमार्थवस्तुभूतमेव
त्वयंनोऽन्यतार्किकबुद्धिविषयाः संतो विरुध्यंते यथेतरेतरां किंच तार्किकाः संख्येयोरित्येव परस्परविरुद्धार्थकल्पनातः ज्ञानिनापि
इवप्राणिनोन्योन्यविरुद्धमाना नार्थदर्शित्वात्परमार्थतत्वाद्दूरमेवापकृष्यन्ते नस्तम्मतमनादृत्य वेदार्थमतमस्य दर्शनं प्रत्
दरत्वनोसुमुक्षवः स्युरिति तार्किकमतदोषदर्शनं किंचिदुच्यते स्मामिर्न तु तार्किकमनिष्पायेण तथेन स्त्रो कौविव इत्येव
लिक्षिप्यविरोधोद्भवकारणं तांनेसरक्षितसबुद्धिस्वत्वानि वर्तित्विवदविरत्वा किंच भोक्तृत्वकर्तृत्वयो विशेषानुपपत्तिः कानामा
सोऽक्तेचाजाग्त्यंतेरमत्ताभोक्तृत्वाविशिष्टोऽविक्रियायनोमोऽतै च पुरुषः कल्प्यते कर्ता[illegible] प्रधानं तु कर्त्रे चनमोक्तिकिमि
न

१६

वास्तवहेतवाल सर्वभावानां साख्यां स्वाविद्याध्यारोपितमेव पुरुषे
कर्तृत्वं क्रियाफलादिकफलत्वं ×५

नन्वत्र पुरुषश्चिन्मात्र एव स्वात्मस्थो विक्रियते भुंजानो न तत्त्वांतरपरिणामेन प्रधानं तु तत्त्वांतरपरिणामेनाविक्रियते ऽनेकमसु
मचेतनं च सर्वधर्मवत् [illegible] तद्विपरीतः पुरुषो नानयोर्विशेषः बाढमत्र लब्धागमो भोगोस्य ते केवलचिन्मात्रस्य पुरुषस्य भोक्तृत्वनाम
विशेषो भोगोत्पत्तिकाले चेऽध्यापन्ने निवृत्ते च भोगे एव न सांद्रोऽपाइ पतांभोगमात्र एव भवतीति चेत् महदाद्याकारेण परि
णाम्य प्रधानं ततो ऽपेत्य पुनः प्रधानं स्वरूपेणाव्यवतिष्ठत इत्यस्या ~~[illegible]~~ कल्पनायां प्रधानकूस्मिन्विद्धिरोषइ नितान्मात्रेण प्रधा
नपुरुषयोर्विशेषविक्रिया कल्प्यते अथ भोगकाले चिच्चिन्मात्र एवं प्रागवस्थारूपइति चेन्न तर्हि परमार्थतो भोगः पुरुष
स्य भोगकाले चिन्मात्रस्य विक्रिया परमार्थेयतेन भोगः पुरुषस्येति चेन्न प्रधानस्यापि भोगकाले विक्रियावत्वाङ्गीकृत्वप्रस
ङ्गः चिन्मात्रस्यैवाविक्रिया भोक्तृत्वमिति चेद्दौर्भाग्यापि असाधारणधर्मवतामन्यादृशो नाम भोक्तृत्वे हेत्वनुपपत्तिः प्रधानपुरु
षयोर्युगपद्भोक्तृत्वमिति चेन्न प्रधानस्य पारार्थ्यानुपपत्तेः नहि भोक्त्रोर्द्वयोरितरेतरगुणप्रधानभाव उपपद्यते प्रकृ
त्यापोरिवैतरेतरप्रकाशने भोगधर्मवति सत्यागिनि चेतसि पुरुषस्य चैतन्यप्रतिबिंबोदयोऽविक्रियस्य पुरुषस्य भोक्तृत्व
मिति चेन्न पुरुषस्याविशेषाभावे भोक्तृत्वकल्पनानर्थक्याद्भोगरूपश्चेदनर्थः पुरुषस्य नास्ति सदा निर्विशेषत्वात्पुरु
षस्य कस्यापनयनार्थं मोक्षसाधनं शास्त्रं प्रणीयते अविद्याध्यारोपितार्थापनयाय शास्त्रप्रणयनमिति चेत् परमार्थ
तः पुरुषो भोक्तैव न कर्ता प्रधानं कर्त्रेव न भोक्तृ परमार्थसद्वस्त्वंतरं पुरुषाच्चेति कल्पनागमबाह्या व्यर्था निर्हेतुका चेति
नाद्रियंते मुमुक्षुभिः एकत्वेऽपि शास्त्रप्रणयनाद्यनर्थकमसार्थकं चेति विकल्पना स्याद्बाह्यात्मैकत्वे शास्त्रप्रणेतारः यस्तात्ता
भिन्नाः संतीति तदभावे इयं कल्पने वानुपपद्येत्तौ ऽभ्युपगते आत्मैकत्वे प्रमाणार्थश्चाभ्युपगतो भवत्यात्मैकत्वमभ्युपग
नात्मस्वपगमे [illegible] विकल्पानुपपत्तिमाह शास्त्रं यत्र सर्वमात्मैवाभूत्तत्केन कं पश्येदित्याद्यं शास्त्रप्रणयनाद्युपपत्तिं चा
स्वरूपा न्यत्र परमार्थवस्तुस्वरूपादविद्याविषये यत्र हि द्वैतमिव भवतीत्याद्यविस्तरशो वाजसनेयके ब्रवीति भेदे विद्याविद्ये परस्परविरु
द्धे न ज्ञानस्यातो न तार्किकवादभटप्रवेशो वेदान्तराजप्रमाणबाहुगुप्त इहात्मैकत्वविषय इति तेन नाविद्याकृतनाम
रूपाद्युपाधिकृतानेकत्वात् साधनभेदव्यवहारलक्षणः स्वप्नादिकर्तृत्वे साधनाद्यभावोऽपि बंधमोक्षौ दर्शितव्यौ पी
दैरूप्ये आत्मानर्थकत्वादिदोषप्रयसक्त इति नोराङ्गः सर्वार्थकर्त्रादिकर्तृत्वोपचाराद्यौ जीवत्वेतिसोत्रानुपपन्नः

4

त

निमित्तानपेक्षत्वाच्च ब्रह्मणो ज्ञानस्वरूपत्वेपि नित्यत्वप्रसिद्धिरतो न च धात्वर्थस्तदक्रियारूपत्वादत एव च न ज्ञा
न नकर्तृ तस्मादेव च ज्ञानशब्दवाच्यमपि ब्रह्म तथापि तदाभासवाचकेन बुद्धिधर्मविषयेण ज्ञानशब्देन तल्ल
क्ष्यते न तूच्यते शब्दप्रवृत्तिहेतुजात्यादिधर्मरहितत्वात्तथा सत्यशब्देनापि सर्वविशेषप्रत्यस्तमितस्वरू
पत्वाद्ब्रह्मणः बाह्यसत्तासामान्यविषयेण सत्यशब्देन लक्ष्यते सत्यं ब्रह्मेति न तु सत्यशब्दवाच्यमेव ब्रह्म एवं
सत्यादिशब्दा इतरेतरसंनिधानादन्योन्यनियम्यनियामकाः संतः सत्यादिशब्दवाच्यान्निवर्तका ब्रह्मणो लक्ष
णार्थाश्च भवंतीत्यतः सिद्धं यतो वाचो निवर्तंते अप्राप्य मनसा सहानिरुक्ते अनिलय इति वाच्यत्वं नीलोत्पलवदवा
क्यार्थत्वं च ब्रह्मणः तद्यथाव्याख्यातं ब्रह्म यो वेद विजानाति निहितं स्थितं गुहायां गूहतेः संवरणार्थस्य निगूढा अ
ज्ञातृ स्यां ज्ञानज्ञेयपदार्था अस्यां इति गुहा बुद्धिः गूढावस्यां भोगापवर्गौ पुरुषार्थौ इति वा तस्यां परमे प्रकृष्टे व्योमन्व्यो
म्न्याकाशे अव्याकृताख्ये तद्धि परमं व्योम एतस्मिन्नु खल्वक्षरे गार्ग्याकाश इत्यक्षरसंनिकर्षाद्गुहायां व्योम्नीति
वा सामानाधिकरण्यादव्याकृताकाशमेव गुहा तत्रापि निगूढाः सर्वे पदार्थास्त्रिषु कालेषु कारणत्वात्सूक्ष्मतरत्वाच्च
तस्मिन्नंतर्निहितं ब्रह्म हार्दमेव तु परमं व्योमेति न्याय्यं विज्ञानांगत्वेन व्योम्नो विवक्षितत्वात् यो वै स बहिर्द्धा पुरुषादाकाशो
यो वै सोंतः पुरुष आकाशो यो यमंतर्हृदय आकाश इति श्रुत्यंतरात्प्रसिद्धं हार्दस्य व्योम्नः परमत्वं तस्मिन्हार्दे व्योम्नि या बुद्धि
र्गुहा तस्यां निहितं ब्रह्म तद्वृत्त्या विविक्तयोपलभ्यत इति न ह्यन्यथा विशिष्टदेशकालसंबंधोस्ति ब्रह्मणः सर्वगतत्वान्निर्वि
शेषत्वाच्च ब्रह्मणः स एवं ब्रह्म विजानन् किमित्याह अश्नुते भुंक्ते सर्वान्निरवशेषान्कामान्भोगानित्यर्थः किमस्मादिव
त्पुत्रस्वर्गादीन्पर्यायेण नेत्याह सह युगपदेकक्षणोपारूढानेवैकयोपलब्ध्या सवितृप्रकाशवन्नित्यया ब्रह्मस्वरूपाव्यति
रिक्तया यामवोचाम सत्यं ज्ञानमिति एतत्तदुच्यते ब्रह्मणा सहेति ब्रह्मभूतो विद्वान्ब्रह्मस्वरूपेणैव सर्वान्कामान्समश्नुते ॥

न यथोपाधिकृतेन स्वरूपेणात्मना जलसूर्यकादिवत्प्रतिबिंबभूतेन सांसारिकेण धर्मादिनिमित्तापेक्षांश्चक्षुरादिकरणापेक्षां
श्च कामानन्यपर्यायेणाश्नुते लोकः कथं तर्हि यथोक्तेन प्रकारेण सर्वज्ञेन [illegible] सर्वगतेन सर्वात्मना ~~जलसूर्यकादिवत्प्रतिबिंब~~
नित्यब्रह्मात्मस्वरूपेण धर्मादिनिमित्तानपेक्षांश्चक्षुरादिकरणनिरपेक्षांश्च सर्वान्कामान्सहैवाश्नुत इत्यर्थः विपश्चिता मे
धाविना सर्वज्ञेन तद्धि वैपश्चित्यं यत्सर्वज्ञत्वं तेन सर्वज्ञस्वरूपेण ब्रह्मणाश्नुत इति इतिशब्दो मंत्रपरिसमाप्त्यर्थः सर्व एव व
ल्ल्यर्थो ब्रह्मविदाप्नोति परमिति ब्राह्मणवाक्येन सूत्रितः स च सूत्रितोऽर्थः संक्षेपतो मंत्रेण व्याख्यातः पुनस्तस्यैव विस्तरेणार्थनि
र्णयः कर्तव्य इत्युत्तरस्तद्वृत्तिस्थानीयो ग्रंथ आरभ्यते तस्माद्वा एतस्मादित्यादिः तत्र च सत्यं ज्ञानमनंतं ब्रह्मेत्युक्तं मंत्रादौ तत्क
थं सत्यं ज्ञानमनंतं चेत्याह तत्र त्रिविधं ह्यानंत्यं देशतः कालतो वस्तुतश्चेति तद्यथा देशतोऽनंत आकाशः न हि देशतस्तस्य प
रिच्छेदोऽस्ति न तु कालतश्चानंत्यं वस्तुतश्चाकाशस्य कस्मात्कार्यत्वात् नैवं ब्रह्मण आकाशवत्कालतोऽप्यंतवत्त्वमकार्यत्वा
त् कार्यं हि वस्तु कालेन परिच्छिद्यते अकार्यं च ब्रह्म तस्मात्कालतोऽप्यनंतं तथा वस्तुतः कथं पुनर्वस्तुत आनंत्यं सर्वानन्यत्वात् भि
न्नं हि वस्तु वस्त्वंतरस्यांतो भवति वस्त्वंतरबुद्धिर्हि प्रसक्ताद्वस्त्वंतरान्निवर्तते यतो यस्य बुद्धेर्विनिवृत्तिः स तस्यांतः तद्यथा गोत्व
बुद्धिरश्वत्वाद्विनिवर्तत इत्यश्वत्वांतं गोत्वमित्यंतवदेव भवतीति स चांतो भिन्नेषु वस्तुषु दृष्टो नैवं ब्रह्मणो भेदोऽतो वस्तुतो
प्यानंत्यं कथं पुनः सर्वानन्यत्वं ब्रह्मण इत्युच्यते सर्ववस्तुकारणत्वात् सर्वेषां हि वस्तूनां कालाकाशादीनां कारणं ब्रह्म
कार्यापेक्षया वस्तुतोऽनंतत्वमिति चेन्नानृतत्वात्कार्यवस्तुनः न हि कारणव्यतिरेकेण कार्यं नाम वस्तुतोऽस्ति यतः कारण
बुद्धिर्विनिवर्तेत वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमेवं सदेव सत्यमिति श्रुत्यंतरात् तस्मादाकाशादिकारण
त्वाद्देशतस्तावदनंतं ब्रह्म आकाशो ह्यनंत इति प्रसिद्धं देशतस्तस्य चायं कारणं तस्मात्सिद्धं देशत आत्मन आनंत्यं न ह्यस
र्वगतात्सर्वगतं किंचिदुत्पद्यमानं ~~किंचि~~ लोके दृश्यते अतो निरतिशयमात्मन आनंत्यं देशतः तथा अकार्यत्वात्कालतः
तद्भिन्नवस्त्वभावाच्च वस्तुतः अत एव निरतिशयं सत्यत्वं

धार्थ१ ति इसर्थो

ओँकारस्योपासनविध्यर्थं त्रयोधर्मस्कंधा इत्याद्यारभ्यं नैवं मंतव्यं सामावयवभूतस्यैवोद्गीथादिलक्षणस्यैवोपासनात्फलं प्राप्यते इति किंतर्हि
यत्सर्वैरपि सामोपासनैः कर्मभिश्चाप्राप्यं तत्फलममृतत्वं केवलादोंकारोपासनात्प्राप्यत इति तत्स्तुत्यर्थः सामोपासनप्रकरणे तदुपन्यासः। त्रयस्त्रि
संख्याकाः धर्मस्य स्कंधा धर्मस्कंधा धर्मप्रविभागा इत्यर्थः। केत इत्याह। यज्ञोग्निहोत्रादिरध्ययनं सनियमस्य ऋगादेरभ्यासो दानं बहिर्वेदि यथाशक्ति
द्रव्यसंविभागो यथाशक्ति भिक्षमाणेभ्य इत्येष प्रथमो धर्मस्कंधो गृहस्थसमवेतत्वात्तन्निर्वर्तकेन गृहस्थेन निर्दिश्यते। प्रथम एकनिर्देशो द्वितीय
तृतीयश्रवणान्नाद्यार्थस्तपइ कृच्छ्रचांद्रायणादि तद्वांस्तापस इति परिव्राड्वा न ब्रह्मसंस्थः आश्रमधर्मसंस्थः ब्रह्मसंस्थस्य त्वमृतत्वश्रवणात् द्विती
यो धर्मस्कंधो ब्रह्मचार्याचार्यकुलवासी अत्यंतं यावज्जीवमात्मानं नियमैराचार्यकुलेवासादयन्क्षपयन्देहं तृतीयः धर्मस्कंधो त्यंतमिति विशेष
णान्नैष्ठिक इति गम्यते उपकुर्वाणस्य स्वाध्यायग्रहणार्थत्वान्न पुण्यलोकत्वं ब्रह्मचर्येण सर्व एते त्रयोप्याश्रमिणो यथोक्तैर्धर्मैः पुण्य
लोका भवंति पुण्यो लोको एषां त इमे पुण्यलोका आश्रमिणो भवंति अवशिष्टस्त्वनुक्तः परिव्राड् ब्रह्मसंस्थो ब्रह्मणि सम्यक्स्थितः सोमृतत्वं
पुण्यलोकविलक्षणममरणभावमेत्यात्यंतिकं नापेक्षिकं देवाद्यमृतत्ववत् पुण्यलोकात्पृथगमृतत्वस्य प्रविभागकरणात् यदि च पुण्यलोकाति
शयमात्रममृतत्वमभविष्यत्ततः पुण्यलोकत्वाद्विभक्तं नावक्ष्यद्विभक्तोपदेशाच्चात्यंतिकममृतत्वमिति गम्यते। अत्र चाश्रमधर्मफलोपन्यासः प्रणवसेवा
स्तुत्यर्थः न तत्फलविध्यर्थः। स्तुतये च प्रणवसेवाया आश्रमधर्मफलविधये चेति हि भिद्येत वाक्यं। तस्मात्स्तुतिप्रसिद्धाश्रमफलानुवादेन प्रणवसेवा
फलममृतत्वं ब्रुवन्प्रणवं स्तौति। यथा पूर्णवर्मणः सेवा भक्तपरिधानमात्रफला राजवर्मणस्तु सेवा राजतुल्यफलेति। तद्वत्प्रणवश्चानतसत्परं ब्रह्म तत्प्र
तीकत्वादेतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परं इत्याद्याम्नायात् काठकेषु युक्तं तत्सेवातोमृतत्वमत्राहुः चतुर्णामाश्रमिणामविशेषेण स्वकर्मानुष्ठानात्पुण्यलो
कतैव हि ज्ञानवर्जितानां सर्व एते पुण्यलोका भवंतीति नात्र परिव्राडवशेषितः परिव्राजकस्यापि ज्ञानं यमा नियमाश्च तप एवेति तप एव द्वितीय इत्यत्र तपःशब्देन प
रिव्राड्तापसो गृहीतोतस्तेषामेव चतुर्णां यो ब्रह्मसंस्थः प्रणवसेवकः सोमृतत्वमेतीति चतुर्णामधिकृतत्वाविशेषाद्ब्रह्मसंस्थत्वे नाप्रतिषेधाच्च स्वकर्म
च्छिद्रेषु च ब्रह्मसंस्थतोपपत्तेर्नैच यमवचना [illegible] ब्रह्मसंस्थशब्दः परिव्राडेकविषय एव रूढो ब्रह्मणि संस्थितिशब्दनिमित्तत्वमुपादाय [illegible] हि
रूढित्यागमुपादद्यैते। सर्वेषां च ब्रह्मसंस्थितिमवोचाम यत्र यत्र। निर्मूनमस्ति ब्रह्मणि स्थितिस्तस्य निमित्तवाचकत्वेन ब्रह्मसंस्थशब्दः परिव्राडेकविषये संको
पुकं चेकारणाभावान्निरोद्धुमशक्यं। न च पारिव्राज्याश्रमविशेषधर्ममात्रेणामृतत्वं ज्ञानानर्थक्यप्रसंगात्। पारिव्राज्यधर्मयुक्तमेव ज्ञानममृतत्वसाधनमिति
चेन्न। आश्रमधर्मित्वाविशेषाद्धर्मो ज्ञानेन साधं विशिष्टश्चेदमृतत्वसाधनमिष्टं तदपि सर्वाश्रमधर्माणामविशिष्टं न च वचनमस्ति परिव्रा
जकस्यैव ब्रह्मसंस्थस्य मोक्षो नान्येषां इति ज्ञानान्मोक्ष इति सर्वोपनिषदां सिद्धांतः। तस्माद्यो ब्रह्मसंस्थः स्यात् स्याश्रमधर्मनार

सोऽन्वतत्वमेती तिन कर्मनिज्रविधाप्रत्यययोर्विरो धात्वर्थादिकारकक्रियाफलभेदप्रत्ययबलं हि निमित्तमुपाददते इदं कुरु इदं मा कु
र्विरिति कर्मविधयः प्रवृत्ताः तन्तु निमित्तेन शास्त्र हते सर्वप्राणिषु दुर्लभं नास्ति देहमेवा हि नीपं मा लौकेवे दं सर्वं शास्त्रेवे दं सर्वं इति जिह्वा स्वाजन्य:
त्रस्य यो विद्यारूपः स्वाभाविकः क्रियाकारकफलभेदप्रत्ययः कर्मविधिनिमित्तमनुपगृह्य नजमैतं भेदाभेदप्रत्ययपर्यो विरोधात्

K K S U LIBRARY
RAMTEK
441 106
M-1399
Dist. Nagpur

```
[OrderDescription]
,CREATED=21.10.20 16:51
,TRANSFERRED=2020/10/21 at 16:53:12
,PAGES=8
,TYPE=STD
,NAME=S0004331
,Book Name=M-1399-JAGDUTPATIKARAN SAH VIGYAN
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,
```